| Subject | Topic | Practice Paper – 2 | Date |
|---|---|---|---|
| Sanskrit | Complete Syllabus | PU – 12 – S | 2017 |

**Max. Marks: 100** **Duration: 3hrs 15 mins**

**I. एकवाक्येन संस्कृतभाषया उत्तरं लिखत ।** **1 x 10 = 10**

1. अद्यापि देवाः कुत्र जन्म इच्छन्ति ?
2. विक्रमादित्यः कथं देशान्तरं निर्गतः ?
3. माकन्दिका नाम नगरी कुत्र अस्ति ?
4. पौरवः कः?
5. राणाप्रतापस्य पिता कः ?
6. श्वेतकेतोः तनयः कः ?
7. शान्त्याः पत्युः नाम किम् ?
8. कर्णस्य रक्षाकवचं किम्?
9. सस्त्रिया किं रक्ष्यते ?
10. कृष्णशास्त्रिणां माता का ?

**II. द्वित्रैः वाक्यैः संस्कृतभाषायां कन्नडभाषायाम् आङ्ग्लभाषायां वा उत्तरं लिखत ।** **2 x 5 = 10**

11. भारतवर्षम् इति किमर्थं कथ्यते?
12. विस्मितः राक्षसः किं पृच्छति?
13. राजपुत्रः मञ्जूषां प्राप्य किं करोति?
14. भारतसर्वकारः राणाप्रतापं कथं गौरवम् असूचयत्?
15. प्रणामावसरे महाश्वेता कीदृशी आसीत्?
16. सुन्दरः किमर्थं स्वग्रामं त्यक्तवान् ?
17. वज्राख्यः कीटः किं करोति ?

**III. पाठनाम उल्लिख्य त्रयाणां श्लोकानाम् अनुवादं कन्नडभाषया आङ्ग्लभाषया वा कुरत ।** **3 x 3 = 9**

18. विश्वस्य मातरस्सर्वाः सर्वाश्चैव महाफलाः ।
    तथा नद्यः स्वप्रकाशाः शतशोऽथ सहस्रशः ॥
19. तदेतां वीक्ष्य दुःखं मे जातं भक्तो हि मे भवान् ।
    तेनैवमुक्तवानस्मि त्यक्त्वा मौनं भवत्कृते ॥
20. कुतो धर्मक्रियाविघ्नः सतां रक्षितरि त्वयि ।
    तमस्तपति घर्मांशौ कथमाविर्भविष्यति ॥
21. धन्योस्मि गमनात्पूर्वमीदृशी सम्पदागता ।

विना तु गुरुशुश्रुषां नान्यद्धाव्यं परं मम ॥

22. श्रुत्वा धर्मं विजानाति श्रुत्वा त्यजति दुर्मतिम् ।
    श्रुत्वा ज्ञानमवाप्नोति श्रुत्वा मोक्षमवाप्नुयात् ॥

**IV. पाठनाम उल्लिख्य कः कं प्रति अवदत् इति संस्कृतभाषया लिखत । 2 x 4 = 8**

23. यं कमेव मा भक्षय ।
24. भवतु, अनिर्वर्णनीयं परकलत्रम् ।
25. मम जीवनं सार्थकं भवेत् ।
26. पुण्डरीक इति नाम चक्रे ।
27. दृढीक्रीयतां चेतः ।
28. स यत्र कुत्रापि भवतु, कालेज् आनेत्व्य एव ।

**V. दशवाक्यैः कन्नडभाषया, आङ्ग्लभाषया वा उत्तरं लिखत । 5 x 5 = 25**

29. विक्रमादित्यस्य प्रभावेण राक्षसः कथं परिवर्तितः ?
30. प्रव्राजकः
31. अङ्गुलियकप्रसङ्गः ।
32. राणाप्रतापेन अनुभूता कष्टपरम्परा ।
33. कीदृशं मुनिकुमारम् अपश्यम् इति महाश्वेता वदति ?
34. सा शान्तिः ।
35. कर्ण–परशुरामयोः संवादः ।
36. विद्यार्थीनां कृते शास्त्रीणां सन्देशः ।

**VI. रिक्तस्थानं पूरयत । 1 x 4 = 4**

37. त्वमात्मानं .......... कुरु ।
38. वैरीणां ............ समुद्रोपमम् आसीत् ।
39. तयोः अहमीदृशी ........ समुत्पन्ना ।
40. अहमस्मि ....... सुन्दरस्य पत्नी ।

(आत्मजा, सैन्यम्, समीहितम्, शान्तिः)

| Subject | Topic | Practice Paper – 2 | Date |
|---|---|---|---|
| Sanskrit | Complete Syllabus | PU – 12 – S | 2017 |

**VII. संयोजयत ।**

**41.** **1 x 4 = 4**

| **क** | **ख** |
|---|---|
| जाह्नवी | गौरी |
| प्रजापतिः | गुप्तधनम् |
| हंसः | गङ्गा |
| विद्या | ब्रह्मा |

**VIII. रेखाङ्कितानि पदानि आश्रित्य प्रश्ननिर्माणं कुरुत । (त्रयाणामेव)** **1 x 3 = 3**

42. पुत्थलिका भोजराजं प्रति अवदत् ।

43. प्रव्राजकः कामवशगः शठः च आसीत् ।

44. कालिदासस्य सप्त कृतयः ।

45. वैरीणां सैन्यं समुद्रोपमम् आसीत् ।

46. अम्बया सह स्नातुम् अभ्यगमम् ।

**IX. यथा निर्देशं कुरुत । (चतुर्णामेव)** **4 x 3 = 12**

47. सन्धिं विभजत/योजयत । (त्रयाणामेव)

भीषणाकृतिः, नैतत्, वहन्तीव, शक्तो + असि, देवाः + ते

48. विग्रहवाक्यं लिखत/समस्तपदं लिखत । (त्रयाणामेव)

पुराणाभारतम्, वद्यशिला, गान्धर्वेण विधिना, राष्ट्रस्य कविः

49. लिङ्ग–विभक्ति–वचनानि लिखत । (द्वयोः)

प्रजानाम्, कौतुकात्, महाशयस्य, तस्याम्

50. लकार–पुरुष–वचनानि लिखत ।

निबोधत, भवेत्, अपनेष्यामि, धारयन्ति

51. पदपरिचयं कुरुत । (त्रयाणामेव)

निर्गतः, दृष्ट्वा, निन्दन्ती, आदाय, स्मरन्

52. प्रयोगपरिवर्तनं कुरुत ।

विधिना दर्शितं प्रभुत्वम्

| Subject | Topic | Practice Paper – 2 | Date |
|---|---|---|---|
| Sanskrit | Complete Syllabus | PU – 12 – S | 2017 |

**अथवा**

राणाप्रतापः प्रतिज्ञां स्वीकृतवान् ।

53. अलङ्कारं सलक्षणं निर्दिशत । (एकस्य)

चिरस्य वाच्यं न गतः प्रजापतिः ।

**अथवा**

चिच्छेद पापस्य कपिः निग्रहज्ञः इव क्रुधा ।

**54. कन्नडभाषया आङ्गलभाषया वा अनुवदत ।** **1 x 5 = 5**

क्रीडा मानवस्य नितराम् आवश्यकी । क्रीडया शक्तिः वर्धते । उल्लासः उत्पद्यते । आरोग्यं जायते । मनः विकसति । जीवनोत्साहः एधते । एकताभावः सम्पद्यते । मैत्री विस्तारं गच्छति । अतः खलु ज्येष्ठाः एकघण्टापर्यन्तं तुल्यशीलवयोभिः क्रिडितव्यमिति उपदिशन्ति ।

**55. संस्कृतभाषया अनुवदत ।** **5**

Karthikeya, the destroyer of demon Tharaka, is the younger son of lord Shiva. Ganesha, the remover of obstacles is his elder son. Kubera, the lord of wealth is His friend. Parvathi, the mother of Universe is His wife. Parvatharaja, the king of mountain is His father in law. Nandi is His vehicle. Veerabhadra is His chief of Army. In spite of all this Lord Shiva begs. What a destiny?

ತಾರಕಾಸುರನನ್ನು ಸಂಹರಿಸಿದ ಕಾರ್ತಿಕೇಯನು ಶಿವನ ಕಿರಿಯ ಮಗ. ವಿಘ್ನನಿವಾರಕನಾದ ಗಣೇಶನು ಹಿರಿಯ ಮಗ. ಸಂಪತ್ತಿಗೆ ಅಧಿಪತಿಯಾದ ಕುಬೇರನು ಪರಮಮಿತ್ರ. ಜಗನ್ಮಾತೆಯಾದ ಪಾರ್ವತಿಯು ಹೆಂಡತಿ. ಮಾವನು ಪರ್ವತರಾಜನು. ಅವನ ವಾಹನವು ನಂದಿ. ಅವನ ಸೇನಾಪ್ರಮುಖನು ವೀರಭದ್ರ. ಇಂಥಹ ಕುಟುಂಬವನ್ನು ಹೊಂದಿದ್ದರೂ ಪರಮಶಿವನು ಭಿಕ್ಷಾಟನೆಯನ್ನು ಮಾಡುತ್ತಾನೆ.

**56. इमं परिच्छेदं पठित्वा प्रश्नानाम् उत्तराणि संस्कृतभाषया लिखत ।** **1 x 5 = 5**

एकस्मिन् ग्रामे एकः पुरुषः आसीत् । तस्य एकः पुत्रः आसीत् । यदा सः तस्य पुत्रेण साकं स्वग्रामं प्रति गच्छति स्म तदा बालकः चेष्टया–'तात व्याघ्रः समागतः' इति अवदत् । तदा पिता पृष्ठतोऽवलोकने व्याघ्रः नासीत् । अनन्तरं किञ्चित् दूरमागमनानन्तरम् कश्चित् व्याघ्रः बालकम् अगृण्हात् । तदा सः बालकः उच्चैः व्याघ्रः इति आक्रोशत् । यथापूर्वं हास्यमेतत् इति भावयित्वा तस्य पिता पृष्टतः अनवलोक्य तूष्णीं निरगच्छत् । अतः अलीकवक्तारं न कोऽपि विश्वसति ।

1. पुरुषः कुत्र आसीत् ?
2. पुरुषः केन साकं गच्छति स्म?
3. बालकः चेष्टया किम् अवदत् ?

4. बालकं कः अगृण्हात् ?
5. कं कोऽपि न विश्वसति ?

**अथवा**

**(आ) विरामकाले स्वपुरं आगन्तुं वयस्याय पत्रमेकं लिखत ।**